# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा- आचार्य-१ (SEM-1) | प्रश्नपत्र-२ | गुणाः - ७० |
| विषयः- वास्तुशास्त्रम् | CC411 | समयः - ०३ तः ०६ |
| दिनाङ्कः - ०६/१२/२०१६ | सन्दर्भग्रन्थः - मयमतम् | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ अधोलिखितयोः एकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०४**

१. सा शुभा सर्ववर्णानां सर्वसम्पत्करी धरा ।
दध्याज्यमधुगन्धा वा वैलसृग्गन्धिका च या ॥

२. वासान्तरं गोमयमिश्राणि सर्वबीजानि वापयेत् ।
दृष्ट्वा तानि विरूढानि फलपक्वगतानि च ॥

**प्र-२ भूपरीक्षा मयमतम् ग्रन्थाधारे सविस्तरं वर्णयत ।** **१२**

**अथवा**

**स्थपतिलक्षणं ग्रन्थाधारेण प्रदर्शयत ।**

**प्र-३ अधोलिखितेषु द्वयोरुत्तरं लिखत ।** **०४**

१. खाते तन्मृदा पुरिते किं फलम् ?

२. वास्तुभेदाः कति ?

३. गृहनिर्माणे कपिसूकरसन्निभाभूम्याः फलं किम् ?

**॥ द्वितीयान्वितिः ॥**

**प्र-४ अधोलिखितयोः एकस्य सान्वयं व्याख्यां कुरुत ।** **०४**

१. ईशान्येश्चैव पर्जन्यो जयन्तश्च महेन्द्र ।
आदित्यः सत्यकश्चैव भृशश्चैवान्तरिक्षकः ॥

२. प्रतिच्याशादिपूर्वान्तं विसृजेद् दक्षिणोत्तरम् ।
ब्रह्मस्थानात् पूर्वगतं तत् त्रिसूत्रं तदुच्यते ॥

**प्र-५ अधोलिखितयोः एकस्योपरि निबन्धं लिखत ।** **१२**

१. दिशानिर्धारणे सूत्रविन्यासविधानम् ।

२. वास्तुपदमण्डले वास्तुपुरुषाङ्गनिर्णयः ।

**प्र-६ द्वयोः उत्तरं लिखत ।** **०४**

१. आसनमेवं परमशायिकवास्तुपदमण्डले कति पदानि सन्ति ?

२. एकाशीतिवास्तुपदमण्डले पूर्वदिशायाः देवतानां नामानि लिखत ।

३. शङ्कुस्थापने शुभमुहूर्तान् लिखतु ।

**॥ तृतीयान्वितिः ॥**

**प्र-७ निम्नलिखितयोः एकस्य ससन्दर्भं व्याख्यायत ।** **०४**

१. ग्रामः खेटः खर्वटमथ दुर्गं नगरमिति च पञ्चविधम् ।
दण्डैस्तेषां मानं वक्ष्येऽहं त्रित्रिभेदभिन्नानाम् ॥

२. हृदये वंशस्थाने शूले सूत्रे च सन्धौ च ।

कर्णसिरायां षट्के नोक्तान्यमरालयादीनि ॥

**प्र-८ ग्रामादिमानं ग्रन्थाधारे विस्तारपूर्वकं वर्णयत । ०८**

**अथवा**

**विप्रसंख्यानुसारेण ग्रामप्रकाराः प्रदर्शयत ।**

**प्र-९ त्रयाणामतिलघूत्तराणि लिखत । ०३**

१. व्याख्यां कुरुत – मङ्गलवीथी ।

२. प्रस्तरग्रामस्य कति भेदाः ?

३. ग्रामनिर्माणे गर्भविन्यासः आवश्यकं न वा ?

४. तैलोपजीविनां गृहनिर्माणं कस्मिन् दिशायां करणीयम् ?

५. ग्रामे उत्तराभिमुखं मातृकास्थापने किं फलम् ?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० निम्नलिखितयोः एकाकारिका सान्वयं व्याख्यात । ०४**

१. द्विशतारिचतुःशतकं यावत्पञ्चाशद्धिवृद्ध्या ।

पञ्चप्रमाणमेवं खर्वटविस्तार उद्द्रिष्टः ॥

२. नद्यद्रिपार्श्वयुक्तं नृपभवनयुतं सबहुरक्षम् ।

यन्नृपतिस्थानकं तत्स्थानीयं समुद्दिष्टम् ॥

**प्र-११ एकस्योपरि निबन्धं लिखतु । ०८**

१. नगरे अन्तरापणविचारः ।

२. राजधानीनगरनिर्माणविधानम् ।

**प्र-१२ त्रयाणामुत्तराणि देयानि । ०३**

१. व्याख्यां कुरुत – पङ्कदुर्गम् ।

२. दण्डकमार्गस्य लक्षणं किम् ?

३. नगरस्य कस्मिन् भागे सुवर्णरत्नादिनाम् आपणं स्थापनीयम् ?

४. केवलनगरस्य लक्षणं किम् ?

५. दुर्गे सरस्वतीदेव्याः स्थापनं कुत्र करणीयम् ?